ज्ञानसंकलिनी तंत्र

नं० १२५६

सं ~~२५०~~ ३०२

5816

F — 8

1 Complete

सं.
क. नी.
तं.
१

ॐश्रीगणेशायनमः अथज्ञानसंकलिनीतंत्र योगशास्त्र कैलासशिखरा
सीनंदेवदेवंजगद्गुरुं पृछतिसामहादेवीब्रूहिज्ञानंमहेश्वरं १ देव्युवाच
कुतःसृष्टिर्भवेदेवकथंसृष्टिर्विनश्यति ब्रह्मज्ञानंकथंदेवसृष्टिसंहारव
र्जितं २ ईश्वरउवाच अव्यक्ताद्भवेत्सृष्टिरव्यक्तास्त्रविनश्यति अव्यक्तंत्र।
लक्षणेज्ञानंसृष्टिसंहारवर्जितं ३ ॐकारादक्षरासर्वास्वेताविद्याश्चतुर्दश
मंत्रयज्ञातपोध्यानंकर्माकर्मैतथैवच ४ षडंगंवेदचत्वारिमीमांसान्याय
विस्तरः धर्मशास्त्रपुराणानिएताविद्याश्चतुर्दश ५ तावद्विद्याभवेत्सर्वाया।
वज्ज्ञानंनजायते ब्रह्मज्ञानपदंगत्वासर्वाविद्याःस्थिराभवेत् ६ वेदशास्त्रपुरा
णानिसामान्यगणिकाइव यापुनःशांभवीविद्यागुप्ताकुलवधूरिव ७ देह।

स्थाः सर्वविद्याश्च देहस्थाः सर्वदेवताः देहस्थसर्वतीर्थानि गुरुवाक्येन लभ्यते ८
अध्यात्मविद्या हि नृणां सौख्यमोक्षकरी भवेत् धर्मकर्म तथा जाप्यमेतत्सर्वं नि
वर्तते ९ काष्ठमध्ये यथा वह्निः पुष्पे गंधः पयो घृतं देहमध्ये तथा देवः पुण्यपाप
विवर्जितः १० इडा भगवती गंगा पिंगला जमुना नदी इडापिंगलयोर्मध्ये सुषुम्णा
च सरस्वती ११ त्रिवेणीसंगमो यत्र तीर्थराजः स उच्यते तत्र स्नानं प्रकुर्वीत स
र्वपापैः प्रमुच्यते १२ देव्युवाच कीदृशी खेचरी मुद्रा विद्या च शांभवी पुनः की
दृश्यध्यात्मविद्या च तन्मे ब्रूहि महेश्वर १३ ईश्वर उवाच मनः स्थिरं यस्य वि
नावलंबनं वायुः स्थिरं यस्य विना निरोधनं दृष्टिः स्थिरा यस्य विनावलोकनं सा
एव मुद्रा विचरंति खेचरी १४ बालस्य मूर्खस्य यथैव चेतः स्वप्नेन हीनो ऽपि।

सं॰
क॰ नी
तं॰
२

2

करोतिनिद्रा ततोगतः यथोनिद्रावलंवसाप्यवविद्याविचरंतिपुंणांभवी १५ दे
व्युवाच देवदेवजगन्नाथब्रूहिमेपरमेश्वर दर्शनानिकथंदेवभवंतिचपृथक्
पृथक् ईश्वरउवाच त्रिदंडीचभवेद्भक्तोवेदाभ्यासरतःसदा प्रकृतिवादरतःसक्तो
वौध्यःशून्येतिवादिनः १७ अतऊर्द्धगामिनोजीवाःततस्तोऽपिताद्दशाः सर्वेना
स्तीतिवार्वाकाःजल्पंतिविषयेस्थिताः १८ उमापृछ्वतिहेदेवपिंडब्रह्मांडलक्ष
णं पंचभूतकथंदेवगुणाःकेपंचविंशतिः १९ शिवउवाच अस्थिमांसनखंचैव
त्वग्रोमानिचपंचमं पृथ्वीपंचगुणाप्रोक्ताब्रह्मज्ञानेनभासते २० शुक्रशोणित
मज्जाचमलमूत्रंचपंचमं अपांपंचगुणाप्रोक्ताब्रह्मज्ञानेनभासते २१ निद्रातृषा
तथाचैवक्षांतिरालस्यपंचकं तेजःपंचगुणाःप्रोक्ताब्रह्मज्ञानेनभासते २२

धारणं चलनं चेतं पसंकोचं प्रसरं तथा वायोः पंचगुणाः प्रोक्ता ब्रह्मज्ञानेन भास
ते २३ कामं क्रोधं तथा मोहं लज्जा लोभं च पंचमं नभः पंचगुणाः प्रोक्तो बलज्ञा
नेन भासते २४ आकाशाज्जायते वायुर्वायोरुत्पद्यते रविः खेरुत्पद्यते तोयं तो
याद्उत्पद्यते मही २५ मही विलीयते तोयं रवौ तोयं विलीयते रविर्विलीयते
वायौ विलीयते तत्र खे २६ पंचतत्वाद्भवेत्सृष्टिस्तत्वात्तत्वं विलीयते पंचतत्वात्प
रं तत्वं तत्वातीतं निरंजनं २७ स्पर्शनं रसनं चैव घ्राणं चक्षुश्च श्रोत्रकं पंचेंद्रिया
णिदं तत्वं मनो साधनमिंद्रियं २८ ब्रह्मांडलक्षणं सर्वं देहमध्ये व्यवस्थितं
साकारस्य विनश्यंति निराकारो न नश्यति २९ निराकारो मनो यस्य निराकारो श
मो भवेत् तस्मात्सर्वं प्रयत्नेन साकारं तु परित्यजेत् ३० देव्युवाच आदिनाथ

सं॰ क॰ नी॰ तं॰ २

3

मयिब्रूहिसमग्रयात्नकथंभवेत् आत्मावैवांतरात्माचपरमात्माकथंभवेत् ११
ईश्वरउवाच शुक्रशोणितमज्जाचमेदोमांसंचपंचमं अस्थितत्वैवसमैनेशरी
रेषुव्यवस्थिताः १२ शरीरंचैवआत्मानमंतरात्मामनोभवेत् परमात्माभवे
च्छून्यंमनोयत्रविलीयते १३ रक्तयात्नभवेन्माताशुक्रयात्नभवेत्पिता शून्यया
तोभवेत्प्राणोगर्भपिंडप्रजायते देव्युवाच कथमुत्पद्यतेवाचाकथंवाचाविली
यते वाकास्यनिर्णयंब्रूहियथशास्त्रानमुदाहर शिवउवाच अव्यक्ताज्जायतेप्राणः
प्राणादुत्पद्यतेमनः मनसोत्पद्यतेवाचामनोवाचिविलीयते १४ देव्युवाच क
स्मिन्स्थानेवसेत्सूर्योकस्मिन्स्थानेवसेच्छशिः कस्मिन्स्थानेवसेद्वायुःकस्मिन्स्था
नेवसेन्मनः १५ शिवउवाच तालुमूलेस्थितश्चंद्रोनाभिमूलेदिवाकरः सूर्यो

ग्रेवसतेवायुर्ब्रह्माग्रेवसतेमनः ३८ सूर्याग्रेवसतेचित्तंचंद्राग्रेजीवितंप्रिये प
नयुक्तिर्महादेवियुक्तवाक्येनलभ्यते ३९ देव्युवाच कस्मिन्स्थानेवसेच्छक्तिः क
स्मिन्स्थानेवसेच्छिवः कस्मिन्स्थानेवसेत्कालोजराकेनप्रजायते ४० ईश्वरउवाच
पातालेवसतेशक्तिर्ब्रह्मांडेवसतेशिवः अंतरिक्षेवसेत्कालोजरातेनप्रजायते ४१
देव्युवाच आहारंकोहरतेकोसौभुंजतेपिबतेकथं जाग्रत्स्वप्नसुषुप्तौचकोवामो
प्रतिबुध्यते ४२ शिवोवाच आहारंकोहरतेप्राणोभुंजतेपिहुताशनः जाग्रत्स्वप्न
सुषुप्तौचवायुःस्वपितिबुध्यते ४३ देव्युवाच कोवाकरोतिकर्माणिकोवालिप्यते
पातकैः कोवाकरोतिपापानिकोवापापैःप्रमुच्यते ४४ शिवोवाच मनःकरोति
पापानिमनोलिप्यतेपातकैः मनश्चतन्मनोभूत्वानपुण्यैर्नचपातकैः ४५ देव्यु।

स.
कु॰नी
तं.
४

4

वाच जीवःकेनप्रकारेणशिवोभवतिकस्मसः कार्यस्यकरणंब्रूहिकथंकिंच
प्रसादयंन ४६ शिवोवाच भ्रांतिबद्धोभवेज्जीवोभ्रांतिमुक्तःसदाशिवः कार्यंहिकर
णंतच्चपुनर्तीर्थविशिष्यते ४७ मनोमध्येशिवोमध्येशक्तिरन्यत्रमारुतः इदंतीर्थमिदं
तीर्थंभ्रमंतितामसाजनाः ४८ आत्मतीर्थंनजानंतिकथंमोक्षोवरानने नवेदोवेदमि
त्याहुर्वेदंब्रह्मसनातनं ब्रह्मविद्यारतोयस्तुसविप्रोवेदपारगः ५० मथित्वाचतुरोवे
दान्सर्वशास्त्राणिचैवहि सारंतुयोगिनोपीत्वातक्रंपिबंतिपंडिताः ५१ उच्छिष्टंसर्व
शास्त्राणिसर्वविद्यामुखेमुखे नोच्छिष्टंब्रह्मणोज्ञानमव्यक्तंचिदनामयं नतपस्तपयर
त्याहुर्ब्रह्मचर्यंतपउत्तमं ऊर्ध्वरेताभवेद्यस्तुसदेवोनतुमानुषः ५२ नध्यानंध्या
नमित्याहुर्ध्यानंशून्यगतंमनः तस्यध्यानप्रसादेनसौख्यंमोक्षोनसंशयः ५४

नहोमं होममित्याहुः समाधौ न तु तद्भूयते ब्रह्माग्नौ हूयते प्राणं होमकर्म तदुच्य
ते ५५ पापकर्म भवेद्बंधः पुण्यं चैव प्रवर्तते तस्मात्सर्वप्रयत्नेन तद्द्वंद्वं च त्यजे।
द्बुधः ५६ यावद्वर्णं कुलं सर्वं तावज्ज्ञानं न जायते ब्रह्मज्ञानपदं गत्वा सर्ववर्णविव
र्जितः ५७ दक्ष उवाच यत्त्वया कथितं ज्ञानं नाहं जानामि शंकर निश्चयं ब्रूहि देवे
शा मनो यत्र विलीयते ५८ शिव उवाच मनो वाक्कं तथा कर्म त्रितयं यत्र लीयते ति
ना स्वप्नं यथा निद्रा ब्रह्मज्ञानं तदुच्यते ५९ एकाकी निस्पृहः शांतश्चिंता निद्रावि
वर्जितः बालभावस्तथा भावो ब्रह्मज्ञानं तदुच्यते ६० ह्मोकार्द्धं त्वप्रवदामित्र
क्तं तत्त्वदर्शिभिः सर्वचिंतापरित्यागो निश्चिंतो योग उच्यते ६१ निमिषं निमिषा
र्द्धं वा समाधिमधिगच्छति शतजन्मार्जितं पापं तत्क्षणादेव नश्यति दक्ष उवाच

सं. का. नी नं. ५

कस्यानामभवेच्छक्तिः कस्यनामभवेच्छिवः एतन्मेब्रूहिभोदेवपश्यज्ज्ञानंप्रकाशय
शिवोवाच चलच्चित्तेवसेच्छक्तिः स्थिरचित्तेवसेच्छिवः स्थिरचित्तेभवेद्देवीसदे
हस्योपिसिध्यति ९४ देव्युवाच कस्मिन्स्थानेत्रिधाशक्तिः षट्चक्रंचतथैवच
एकविंशतिब्रह्मांडंसप्तपातालमेवच ९५ शिवोवाच [illegible] र्भवेत्कंठः ऊ
र्ध्वःशक्तिर्भवेद्गुदा मध्यशक्तिर्भवेन्नाभिशक्त्यातीतंनिरंजनं ९६ [illegible]
चक्रंतस्याधिष्ठानंचलिंगकं चक्रभेदंमयाख्यातंचक्रातीतंनमोनमः ९७ काया
र्ध्वंब्रह्मलोकस्स्वयःपातालमेवच ऊर्ध्वमूलमधःशाखंवृक्षाकारंकलेवरं ९८
देव्युवाच शिवशंकरईशानब्रूहिमेपरमेश्वर दशवायुकथंदेवदशद्वाराणिचैव
हि ९९ शिवोवाच हृदिप्राणःस्थितोवायुरपानोगुदसंस्थितः समानोनाभिदेशे

न्तुउदानःकंठसंस्थितः १० व्यानःसर्वगतोदेहेसर्वगात्रेषुसंस्थितः नागऊर्द्ध्वे
गतोवायुःकूर्मोमीस्थीनिसंस्थितः ११ ककरःक्षोभितेचैवदेवदत्तोपिजृंभणे धनं
जयोनादघोषेनिवेशोव्वैवसन्मतिः १२ एतेवायुनिरालंवयोगिनांयोगसंमतः
नवद्वारंच[illegible]नउच्यते १३ देव्युवाच नाडीभेदंचमेब्रूहिसर्वगात्रेषुसं
स्थि[illegible]ःकुंडलिनीचैवप्रसूतेदशनाडिका १४ शिवोवाच इडाचपिंगलाचैवसु
षुम्णाचोर्द्ध्वगामिनी गांधारीहस्तिजिह्वाचप्रसरागमनायता १५ अलंवुषायशाचै
वदक्षिणांगेसमाश्रिता कुहूश्चशंखिनीचैववामांगेवपोःस्थिता १६ एतासदक्ष्ना
डीषुनानानाडीप्रसूतिकाः द्विसप्ततिसहस्राणिशरीरेनाडिकाःस्मृताः १७ एतां
योविंदतेयोगीसयोगीयोगलक्षणः ज्ञाननाडीभवेद्देवियोगिनांसिद्धिदायिनी १८

सं॰ क॰ नी तं॰ ६

6

देव्युवाच भूतनाथमहादेवब्रूहिमेपरमेश्वर त्रयोदेवाःकथंदेवत्रयोभावास्त्रयो
गुणाः शिवोवाच रजोभावेस्थितोब्रह्मासत्वभावेस्थितोहरिः क्रोधभावेस्थितोरुद्र
स्त्रयोदेवास्त्रयोगुणाः ८० एकमूर्तिस्त्रयोदेवाब्रह्मविष्णुमहेश्वराः नानाभावेमनोय
स्यतस्यमुक्तिर्नजायते ८१ वीर्यरूपीभवेद्ब्रह्मावायुरूपीस्थितो हरिः मनोरूपीस्थितो
रुद्रस्त्रयोदेवास्त्रयोगुणाः ८२ दयाभावेस्थितोब्रह्माशुद्धभावेस्थितो हरिः अग्निभावे
स्थितोरुद्रस्त्रयोदेवास्त्रयोगुणाः ८३ एकमूर्तंपरंब्रह्मजगत्सर्वंचराचरं नानाभावेम
नोयस्यतस्यमुक्तिर्नजायते ८४ अहंसृष्टिरहंकालोप्यहंब्रह्माप्यहंहरिः अहंरुद्रो
प्यहंशून्यमहंव्यापीनिरंतरं ८५ अहंसर्वात्मकंदेविनिष्कामोगगनोपमः स्वभावो।
निर्मलंशांतंसेवाहंनसंशयः ८६ जितेंद्रियोभवेच्छूरोब्रह्मचारीसपंडितः सत्य

वादीभवेद्ब्रह्मक्रोदाताधीरोहितेरतः ८७ ब्रह्मचर्य्यंतपोमूलंधर्मस्मूलंदयास्मृ
ता तस्मात्सर्वप्रयत्नेनदयाधर्मंसमाश्रयेत् ८८ देव्युवाच योगेश्वरजगन्नाथउ
मायाःप्राणवल्लभ वेदसंध्यानपोध्यानंहोमकर्मफलंकथं ८९ शिवोवाच अश्वमे
धसहस्राणिवाजपेयशतानिच ब्रह्मज्ञानंसमंपुण्यंकलांनार्हंतिषोडशीं ९० सर्व
दासर्वतीर्थेषुयत्फलंलभतेध्रुविः ब्रह्मज्ञानंसमंपुण्यंकलांनार्हंतिषोडशीं ९१
नमित्रंनचपुत्रश्चनपितानचबांधवाः नयच्छामिगुरोस्तस्यंयदृष्टंपरमंपदं ९२ न
चविद्यागुरोस्तुल्यानातिथ्यंनचदेवताः गुरोस्तुल्यंनवैकोपियदृष्टंपरमंपदं ९३
एकमप्यक्षरंयस्तुगुरुःशिष्येनिवेदनं पृथिव्यांनास्तितद्द्रव्यंयद्दत्वाचानृणीभवेत् ९४
यस्यकस्यनदातव्यंब्रह्मज्ञानंसुगोपितं यस्यकस्यापिभक्तस्यसद्गुरुस्तस्यधीयते ९५

सं.
क. नी.
तं.
१८

मंत्रप्रजातपोध्यानंहोमंजप्योवलिक्रिया संन्यासंसर्वकर्माणिलौकिकीनीत्यजे
द्गुयः ९६ संसर्गाद्वहवोदोषाःनिसंगाद्वहवोगुणाः तस्मात्संगप्रयत्नेनयतिसं
गंपरित्यजेत् ९७ अकारःसात्विकोज्ञेयोउकारोराजसःस्मृतः मकारस्तामसःप्रो
क्तस्त्रिभिःप्रकृतिरुच्यते ९८ अक्षराप्रकृतिःप्रोक्ताअक्षरःस्वयमीश्वरः ईश्वराति
गेनासाहिप्रकृतिर्गुणवंचना ९९ सामायापालिनीशक्तिःसृष्टिसंहारकारिणी अ
विद्यामोहिनीयासाशाहृद्रूपायप्रकाशिनी १०० अकारश्चैवऋग्वेदउकारोयजुरुच्य
ते मकारःसामवेदस्तुत्रिष्वप्रोक्तोप्यथर्वणः १०१ ओंकारस्तस्तनोक्तेयस्त्रिनादर्शनिसं
स्थितः अकारस्त्वथभूर्लोकउकारश्चभुवरुच्यते १०२ सव्यंजनमकारस्तुस्वर्लोकस्तुवि
धीयते अग्नेरैश्मिर्भिरेनैश्चभवेदात्मावपुस्थितः १०३ अकारःपृथिवीज्ञेयापीतवा

र्णेनसंयुता अंतरिक्षउकारस्तु विद्युद्वर्णइहोच्यते १४ मकारःस्वरितिज्ञेया
शुक्लवर्णेनसंयुतः ध्रुवमेकाक्षरंब्रह्म ॐमित्येवंव्यवस्थितं १५ स्थिरासनोभवे
न्नित्यंचिंतानिद्राव्यवस्थितः आशुसंजायतेयोगीनान्यथाशिवभाषितं १६ यइ
दंपठतेनित्यंशृणोतिचदिनेदिने सर्वपापविशुद्धात्माशिवलोकंसगच्छति १७
देव्युवाच स्थूलसूक्ष्मलक्षणंब्रूहिकथंमनोविलीयते परमार्थंचनिर्वाणंस्थूलसूक्ष्म।
स्यलक्षणं १८ शिवोवाच येनज्ञानेनहेदेविविद्यतेनचकिल्बिषं पृथिव्याप।
स्तथातेजोवायुराकाशमेवच १९ स्थूलरूपीस्थितोपंचसूक्ष्मंचत्रयमथास्थितिः २०
इतियोगशास्त्रेहरगौरीसंवादेज्ञानसंकलिनीतंत्रंसमाप्तम् ॥

8